# 2022

## SANSKRIT — HONOURS

### Paper : CC-9

### (Modern Sanskrit Literature)

### Full Marks : 65

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**(Marks : 35)**

**Unit - I**

**(Marks : 05)**

1. अधोलिखितेषु कस्य***चिदेकस्य*** टीका लेखनीया। 5×1

(a) पाण्डवविजयम्।

(b) धनुर्भङ्गम्।

(c) म० म० श्रीजीवन्यायतीर्थः।

**Unit - II**

**(Marks : 30)**

2. अधोलिखितयोः कस्य***चिदेकस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च देयम्। 10×1

(a) आधुनिकसंस्कृतसाहित्ये हरिदाससिद्धान्तवागीशस्य अवदानं विचार्यताम्।

(b) आधुनिकसंस्कृतसाहित्ये परमानन्दशास्त्रिणः अवदानं पर्यालोच्यताम्।

3. अधोलिखितेषु यथामति ***अष्टानां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च संक्षेपेण देयम्। 2×8

(a) क्षमाराओ-महोदयायाः पितुः मातुश्च नामनी किम्?

(b) श्रीधरभास्करवर्णेकरस्य जन्मस्थानं जन्मकालश्च लिख्येताम्।

(c) जानकीवल्लभशास्त्रिणः कृतिद्वयस्य नाम लिख्यताम्।

(d) क्षमाराओमहोदयया किं नामधेयम् उपाधिद्वयं प्राप्तमासीत्?

(e) 'काकली' 'वन्दिमन्दिरम्' चेति ग्रन्थद्वयस्य रचयिता कः?

(f) को नाम कविवरः किमर्थं 'देवभाषानृपति'रिति उपाधिना भूषितोऽभवत्?

(g) रेवाप्रसादद्विवेदिनः जन्मस्थानं जन्मकालश्च लिख्येताम्।

(h) 'सुरभिकाश्मीरम्' इति काव्यस्य कविः कः? तस्मिन् काव्ये कति पद्यानि सन्ति?

(i) जगन्नाथपाठकेन विरचितयोः द्वयोः संस्कृतग्रन्थयोः नामनी लिख्येताम्।

(j) संस्कृतभाषया विरचितस्य एकस्य 'सनेट्'-काव्यस्य तथा तस्य रचयितुश्च नामनी लिख्येताम्।

(k) यतीन्द्रविमलचौधुरिणा कस्य प्रख्यातस्य आङ्गलकवेः किंनामधेयं आङ्गलनाटकद्वयं संस्कृतभाषया अनूदितम्?

(l) लीलाराओदयालमहोदयायाः पितुः मातुश्च नामनी लिख्येताम्।

4. अधोलिखितेषु कस्य***चिदेकस्य*** टीका लेखनीया। 4×1

(a) श्रीपुत्तिल्लत्तु-कृष्णनारायण-पिल्लाइ।

(b) श्रीरामकरणशर्मा।

(c) श्रीमूलशङ्कर-माणिकलाल-याज्ञिकः।

**Section - B**

**(Marks : 30)**

**Unit - I**

**(Marks : 10)**

5. अधोलिखितयोः कस्यचन ***एकस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च देयम्। 10×1

(a) शिवराजविजयनामकस्य गद्यकाव्यस्य प्रथमनिश्वासे प्रतिविम्बितं ब्रह्मचारिगुरोः चारित्रिकं वैशिष्ट्यजातं सोपपत्तिकं वर्ण्यताम्।

(b) गद्यकाव्यविशेषत्वेन शिवराजविजयस्य व्यैशिष्ट्यजातं सोपपत्तिकं पर्यालोचयतु।

**Unit - II**

**(Marks : 10)**

6. अधोलिखितयोः कस्य***चिदेकस्य*** उत्तरं लेख्यम्। 10×1

(a) "अथ किम्" इति नाट्यकृतिमनुसृत्य 'आ'-नामकस्त्रीचरित्रस्य 'ऊ'-नामकस्त्रीचरित्रस्य वा चारित्रिकवैशिष्ट्यानि पर्यालोचयतु।

(b) आधुनिकनाटकरूपेण अथ किम् इति नाटकस्य तात्पर्यानुसारतः मूल्यायनं क्रियताम्।

## Unit - IV

**(Marks : 10)**

7. अधोलिखितयोः कस्यचन **एकस्य** श्लोकस्य **संस्कृतभाषया देवनागरलिप्या** च सप्रसङ्गं व्याख्या कार्या। 7×1

(a) कलावतः सकलजनप्रमोदिनः
सितात्मनोऽप्यमृतकरस्य यस्य च।
कलङ्किनीं किल परिचायिनीं तनो-
र्विधोर्विधां ननु विदधौ पटुर्विधिः॥

(b) निरन्तरं दिशि दिशि गायतां सतां
मुखाम्लिका-परिणति-चिह्न-चिह्नितम्।
सुधाम्बुधेर्जलविमलं च यद् यशः
जगज्जनाः शशधरमेव मेनिरे॥

8. (a) कस्य**चिदेकस्य** विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्। 2×1

(i) सकलजनप्रमोदिनः 7(a) प्रश्ने।

(ii) सुधाम्बुधेः 7(b) प्रश्ने।

(b) कस्य**चिदेकस्य** व्युत्पत्तिः निर्णेया। 1×1

(i) विदधौ 7(a) प्रश्ने।

(ii) गायताम् 7(b) प्रश्ने।

---